# श्री गायत्री भुजंग स्तोत्रं

उषःकालगम्या मुदात्त स्वरूपां
अकारप्रविष्टा मुदारांगभूषाम् ।
अजेशादि वंद्यामजार्चांगभाजां
अनौपम्यरूपां भजाम्यादि संध्याम् ॥ 1

सदा हंसयानां स्फुरद्रत्न वस्त्रां
वराभीति हस्तां खगाम्नायरूपाम् ।
स्फुरत्स्वाधिकामक्षमालां च कुंभं
दधानामहं भावये पूर्वसंध्याम् ॥ 2

प्रवाल प्रकृष्टांग भूषोज्ज्वलंतीं
किरीटोल्लसद्रत्न राजप्रभाताम् ।
विशालोरु भासां कुचाश्लेषहारां
भजे बालिकां ब्रह्मविद्यां विनोदाम् ॥ 3

स्फुरच्चंद्र कांतां शरच्चंद्रवक्त्रां
महाचंद्रकांताद्रि पीनस्तनाढ्याम् ।
त्रिशूलाक्ष हस्तां त्रिनेत्रस्य पत्नीं
वृषारूढपादां भजे मध्यसंध्याम् ॥ 4

© 2022 Vedam Nadam

षडाधाररूपां षडाधारगम्यां
षडध्वातिशुद्धां यजुर्वेदरूपाम् ।
हिमाद्रेस्सुतां कुंद दंतावभासां
महेशार्धदेहां भजे मध्यसंध्याम् ॥ 5

सुषुम्नांतरस्थां सुधासेव्यमानां
उकारांतरस्थां द्वितीयस्वरूपाम् ।
सहस्रार्करश्मिं प्रभासत्रिनेत्रां
सदा यौवनाढ्यां भजे मध्यसंध्याम् ॥ 6

सदासामगानां प्रियां श्यामलांगीं
अकारांतरस्थां करोल्लासिचक्राम् ।
गदापद्महस्तां ध्वनत्पांचजन्यां
खगेशोपविष्टां भजे मास्तसंध्याम् ॥ 7

प्रगल्भस्वरूपां स्फुरत्कंकनाढ्यां
अहं लंबमान स्तनप्रांतहाराम् ।
महानीलरत्न प्रभाकुंडलाभ्यां
स्फुरत्स्मेरवक्त्रां भजे तुर्यसंध्याम् ॥ 8

सदातत्त्वमस्यादि वाक्यैकगम्यां
महा मोक्षमार्गैक पाथेयरूपाम् ।
महसिद्ध विद्याधरैस्सेव्यमानां
भजेहं भवोत्तारणीं तुर्यसंध्याम् ॥ 9

हृदंभोजमध्ये पराम्नायनीडे
सुखासीन सद्राजहंसां मनोङ्ज्ञाम् ।
सदा हेमभासां त्रयीविद्यमध्यां
भजाम स्तुवामो वदाम स्मरामः ॥ 10

सदा तत्पदैस्तूयमानां सवित्रीं
वरेण्यां महभर्गरूपां त्रिनेत्राम् ।
सदा देवदेवादि देवस्यपत्नीं
अहं धीमहीत्यादि पादैक जुष्टाम् ॥ 11

अनाथं दरिद्रं दुराचारयुक्तं
शठं स्थूलबुद्धिं परं धर्महीनम् ।
त्रिसंध्यां जपध्यानहीनं महेशीं
परं चिंतयामि प्रसीद त्वमेव ॥ 12

© 2022 Vedam Nadam

इतीदं भुजंगं पटेद्यस्तु भक्त्या
समाधाय चित्ते सदा श्री भवानीम् ।
त्रिसंध्यस्वरूपां त्रिलोकैक वंद्यां
स मुक्तो भवेत्सर्व पापै रजस्रम् ॥ 13

॥ इति श्री गायत्री भुजंग स्तोत्रं संपूर्णम् ॥